ॐ

न॰ भ॰ ॐ स्वस्ति श्रीगणेशाय नमः ॥ ॐ अन्यासां निखिलार्थचिन्तासिद्धिदशीसंदोहा सद्भाभीष्टदा ॥ स्वज्ञानप्रकाशाय यस्मन

१ सोऽखिलसमस्तादिषु श्रीविश्वेश्वरराम्बुजभवमधवासेकपीनपाय इन्दुसंनिधायनज्ञिमपमनकोमृतनन्यते १

अथ श्रुतिः श्रूयते याज्ञवल्क्यमैत्रेयी संवादे आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति अस्यार्थः मुमु

क्षुणा आत्मा द्रष्टव्यः मुमुक्षोरात्मदर्शनं मोक्षसाधनमिति यावत् केनोपायेनात्मदर्शनोपायो इत्याह ॥ श्रोतव्य इत्यादि

तेनार्थक्रमेणास्य क्रमस्य क्रमो भवति श्रुतिर्दर्शनं जुहोति यवागूं पचति इत्यादिवत् तथा च श्रवणमननादिध्यासि

तानि तत्त्वज्ञानसाधनानि तेषु क्रमो भवति श्रुतश्रुतिः कृतानां श्रवणस्य मनने निधिकारः मननं चानुमानं तच्च भिन्न

त्वेनानुमानं तच्च भेदप्रतियोगिज्ञानसाध्यं च तथा चेतरेभ्यः पृथक्त्वेन पदार्थनिरूपणस्यापेक्षितः सामान्यतः

पदार्थो द्विविधः भावोऽभावश्चेति भावः षड्विधः द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाभेदात् तत्र द्रव्यत्वगु

पीन्नु १ णत्वकर्मत्वानि जातयः सामान्यत्वाद्युपाधयः द्रव्याणि नव पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि आ

काशत्वकालत्वदिक्त्वानुपाधयः अन्यानि जातयः तत्र रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि

भागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारा चतुर्दशगुणाः पृथिव्याः तत्र गन्धविहाय स्नेहविनियोज्य चतुर्दशगुणा

जलस्य रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगवि परत्वापरत्वद्रवत्वसंस्कारा एकादशगुणास्तेजसः स्प

र्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वाप स्कारा नव गुणा वायोः शब्दसंख्यापरिमाणपृथक्त्वसं

योगविभागाः षड्गुणा आकाशस्य संख्यापरिमाणपृथक्त्वसंयोगविभागाः पञ्चगुणाः कालदिशोः संख्या

१

परिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराख्याश्चतुर्दशगुणा आत्मनः संख्या
परिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्काराख्याष्टौ मनसः ज्ञानेच्छाकृतिसंख्यादिपञ्चकमष्टौ ईश्वरस्य
तथा च वायोर्नवैकादश तेजसो गुणा जलक्षितिप्राणभृतां चतुर्दश दिक्कालयोः पञ्च षडेव चाम्बरे महेश्वरेऽष्टौ मन
सस्तथैव च १ तत्र पृथिवीजलतेजोवायवो द्विविधाः परमाणवः सावयवाश्च आकाशकालात्मदिशो विभूतयः।
मनः परमाणुरूपं तत्र सावयवाश्चानित्याः इतराणि नित्यानि सावयवोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् मा
नुषाणां शरीरं पार्थिवं जलीयं शरीरं वरुणलोके प्रसिद्धं तैजसं शरीरमादित्यलोके वायवीयं शरीरं वायुलोके प्रसि
द्धं घ्राणेन्द्रियं पार्थिवं रसनेन्द्रियं जलीयं चक्षुरिन्द्रियं तैजसं त्वगिन्द्रियं वायवीयं श्रोत्रेन्द्रियं कर्णशष्कुल्यवच्छिन्नो
नभःप्रदेशः एतानि पञ्च बहिरिन्द्रियाणि मनो अन्तरिन्द्रियं तेन षडिन्द्रियाणि विषयास्तु शब्दस्पर्शादिरूपेण प्रसिद्धाः
आत्मा द्विविधः जीवात्मा परमात्मा च तत्र जीवात्मानः प्रतिशरीरं भिन्ना बन्धमोक्षयोग्याः परमात्मा ईश्वर आ
पञ्चस्वपि प्रत्यक्षद्रव्याणि परमाणुको त्र्यणुके महद्भूतरूपवत्त्वयस्तानि पृथिवीजलतेजांसि प्रत्यक्षाणि आत्मा च
प्रत्यक्षः वाय्वाकाशकालदिङ्मनांसि त्वप्रत्यक्षाणि बहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वोद्भूतरूपवत्त्वं प्रयोजकं अथ द्र
व्योत्पत्तिप्रक्रिया नवीनत्रिकारणवती अनन्यथासिद्धनियतपूर्ववर्ति कारणम् तच्च कारणं त्रिविधानि कार
णानि समवायिकारणमसमवायिकारणानि निमित्तकारणानि यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा प
रमाणुर्द्व्यणुकस्य कपालं घटस्य समवायिकारणे सम्बद्धं कारणमसमवायिकारणं यथा परमाणुद्वयसंयोगो द्व्य

श्री
त॰ स॰
२
कारणानि

त्वकस्य कपालद्वयघटस्य समवायिकारणं तन्निमित्तकारणं यथा प्राणके इश्वरः घटे कुलालः तत्कारणत्र
यं भावकार्यमात्रस्य तत्र समवायिकारणं सर्वद्रव्याणि च समवायिकारणं द्रव्यं गुणः गुणानां गुणत्व. कर्मस्य कार्यमात्रं प्रति
साधारणानि ईश्वरस्तज्ज्ञानचिकीर्षाकृतयः प्रागभावकालदिशादृष्टानि तत्र प्रथमं प्रत्यक्षं तेषामनुमानं करणमन्यानि तेन म
युक्तं प्रत्यक्षमप्रमाणेन. एवमनुमानादिकपालात् कपालद्वयसंयोगेन घटो जायते घट नित्यार्थ... स्वयं तथा
प्रमाणं कथ्यते प्रत्यक्षं प्रत्यक्षमेव प्रमाणं अतीन्द्रियं अनुमानं तत्र हेतु साध्य दृष्टान्त ज्ञानसाध्य विशेषोप
त्वेन परमाणु द्व्यणुकोऽनुमानं यथाक्रमेण. साध्यवद्द्व्यादि. वह्निविशिष्टं पर्वतवत्वात् वह्नि विशिष्ट घट
यत्र तन्नाशकद्व्यादि यथा घट अत्र परमाणुः पक्ष. साध्यवद्द्व्यादि साध्य वह्निविशिष्ट पर्वत द्व्यादि
तिहेतुः घटोदृष्टान्त अनेन द्व्यणुकपरमाणुश्च सिध्यति अकाश वायवादि नस्पर्शनक्षत्वनुमीयते शब्दो द्व्यादि
नोगुणत्वात् यथा घटत्वम् अनेन द्व्यान्तरबाधा चक्षुः प्रत्यक्षेनाकाशं सिध्यति पृथिव्यादि द्रव्यान्तर्यमस्पर्श
द्व्याश्रितो गुणत्वात् इत्यनुमानेन द्व्यान्तरबाधा अस्पर्श अन्यत्वेन वायु सिध्यति कालेप्रमाणं यथा
त्वेहि द्विविधे कालिक दैशिके च परत्वापरत्वे अत्र वृद्धत्वे विक्रियाविशिष्ट शरीरज्ञानात्. तत्र परत्वं ज्येष्ठत्वं मपरत्वं क
निष्ठत्वं तदनुमानं यथा पश्यजनकं ... विक्रियाविशिष्ट शरीरज्ञानमिदं परंपराश्वघटक मापेक्ष्य
ज्ञानसंबन्धाभाव सति विशिष्टज्ञानत्वात् लोहित स्फटिक इति प्रत्ययवत् परासंबद्ध अविक्रियाया सममवा
यिसंयुक्त संयोग तेन संबन्ध घटक तया काल सिध्यति. नच कालस्य भूत भविष्यद्वर्तमान भेदेन गुरुत्वात्कुत

त॰ दी॰ ...
राम॰
२

एकत्वमितिचेन्न उपाधिभेदेन भेदप्रत्ययसत्कालोपाधेः योऽसत्त्विक्रियादिरूपाभिन्नात्पर्वते एकत्वमपरत्वंपरत्वादि
श-सिद्धिः नेच स्वत्वसमीपत्वे ... बहुतरमूर्तसंयोगविशिष्टत्वमीदृशज्ञानमिदं परत्वजनकं परत्वस
वधवदेकसोपत्वमित्यादित्याहिपूर्वकं तेनचादिशोसिद्धः नचाकाशमेवमयेव घटकसामान्यमिति वाच्यम्
तस्य शब्दाश्रयत्वेनैवधर्मिग्राहकप्रमाणसिद्धत्वात् नच क्रियाश्रुपपन्नायकत्वसंभव सुखदुःखादि प्रत्यक्ष
आत्मनि प्रमाणं ईश्वरेऽनुमानं यथा क्षिति सकर्तृकं कार्यत्वात् घटवत् तेनेश्वरस्य ज्ञानचिकीर्षाकृ
कृतीनां तत्सार्वज्ञस्य च सिद्धिः मनसि प्रमाणं यथा सुखादिप्रत्यक्षमिन्द्रियजन्यं जन्यप्रत्यक्षत्वात् घटप्रत्य
क्षवत् नेत्रादीनां बाधे मनसः सिद्धिः अथ द्रव्यनाशप्रक्रिया द्रव्यनाशो द्विविधः क्वचिदसमवायिकारण
नाशात् क्वचित्समवायिकारणनाशात् तत्राद्यो यथा परमाणुद्वयसंयोगनाशात् द्व्यणुकनाशः द्वितीयो यथा
कपालनाशात् घटनाशः घटनाशे उभयं न संभवति आकाशकालदिगात्मपरमाणवो नित्याः नित्यं मनः
वायवश्च पृथिव्यादिचत्वारोऽनित्याः तत्र पृथिवीजलतेजोवायुमनसां क्रियावत्त्वं मूर्तत्वे पृथिव्यप्तेजोवायव्योम्नां
अधिकरणत्वं कालस्य कालिकसंबन्धेन सर्वाधिकरणत्वं दिशो दैशिकसंबन्धेन सर्वाधिकरणत्वं अथ गुणाः
कथ्यन्ते रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरु
त्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशतिगुणाः तत्र रूपादीनि सर्वाण्येव ज्ञेयानि रूपं पृथिवीजलते
जोवृत्ति तच्च शुक्लकृष्णरक्तपीतचित्रादिभेदाद्बहुविधं पृथिवीवृत्ति अभास्वरशुक्लरूपं जलवृत्ति शुक्लभास्वरं ते
जोवृत्ति रसः पृथिवीजलवृत्ति मधुराम्ललवणकटुतिक्तकषायभेदात् षड्विधो रसः पृथिव्यां जले मधुरः

श्री

त॰ कं॰

व रसः। गन्धो द्विविधः सुरभिरसुरभिश्च पृथिवीमात्रवृत्तिः। स्पर्शः पृथिव्यादिचतुष्टयवृत्तिः। स च त्रिविधः अनुष्णा
शीत शीतोष्णभेदात्। अनुष्णाशीतस्तु पृथिव्याम्। जले शीतः। तेजस्युष्णः। संख्यापरिमाणपृथक्त्वसंयोग
विभागास्तु द्रव्यमात्रवृत्तयः। परत्वापरत्वे पृथिवीजलतेजोवायुमनोवृत्तिनी। बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नभा
वनाधर्माधर्मा आत्मवृत्तयः। गुरुत्वं पृथिवीजलवृत्ति। द्रवत्वं पृथिवीजलतेजोवृत्ति। तद् द्विविधं नैमित्तिकसां
सिद्धिकं आद्यं पृथिवीतेजसोः। द्वितीयं जले। स्नेहो जलमात्रवृत्तिः। संस्कारः पृथिवीजलतेजोवाय्वात्ममनो
वृत्तिः। स त्रिविधः वेगो भावना स्थितिस्थापकश्चेति। तत्र वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। द्वितीयस्त्वात्ममात्रवृ
त्तिः। तृतीयः पृथिव्यादिचतुष्टयवृत्तिः। शब्दो द्विविधः ध्वन्यात्मको वर्णात्मकश्च आकाशमात्रवृत्तिः। धर्माधर्मा
वात्मवृत्ती। रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाविशेष
गुणाः। तथा चोक्तं रूपगन्धरसस्पर्शाः स्नेहः सांसिद्धिको द्रवः बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः
संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः
अपाकजरूपादयो जलतेजोवायुपरमाणूनां विशेषगुणाः परमाणुवृत्तिगुरुत्वस्थितिस्थापकश्च विभुत्वा
प्रमाणज्ञानैकत्वपरिमाणत्वपृथक्त्वानि ईश्वरज्ञानेच्छाकृतयश्च नित्यगुणाः। अथ प्रत्यक्षगुणाः। गुरुत्वध
र्माधर्मभावनास्थितिस्थापकश्च परमाणुपरिमाणत्वं च गुणाः। अतीन्द्रियत्वसामान्यगुणाः। त्रसरेणोः पृथिवि
हायाः गुणा अतीन्द्रियाः। रूपरसगन्धस्पर्शस्नेहद्रवत्वसंख्यासत्संख्यापृथक्त्वसंयोगैकं सामान्यगुणाः
त्वदेशस्या अयथार्थत्वबुद्धिः प्रत्यक्षे स्वप्रयोजनविशिष्टज्ञानत्वं सुखादिप्रत्यक्षे स्वप्नान्तिः सुखत्वादिकमेव सत्यादि राम

३

त॰ के॰
८
अथ कर्मजं विभागमाह आद्यो भवेत् कर्मणा आत्मनः संविभागः। द्वितीयः पाणिमयो कर्मणा तयोर्विभागः विभा
गजः विभागो द्विविधः कारणमात्रविभागजः कारणाकारणविभागजश्च आद्यो यथा कपालकर्मणा कपालद्वयवि
भागजाः कपालद्वयसंयोगनाशस्ततो घटनाशस्ततः कपालस्याकाशादिदेशाद्विभागजो विभागः तत्र विभागः स्वो
त्पत्त्यनन्तरमेव विभागजविभागं जनयतीति वाच्यम् द्रव्यनाशसहकृतस्यैव तस्य तज्जनकत्वात् न द्रव्यस्य प्रतिबन्ध
कत्वमिति द्रव्यनाशसंभवात् न च कर्मैव पक्षद्वाक्कपालद्वयविभागस्याकाशकपालविभागजनकमपीति वाच्यम् यत
द्रव्यारम्भकसंयोगविरोधिनं विभागमारभते तत् द्रव्यारम्भकसंयोगविरोधिनं यथाविकसत्कुड्मलकमलदल
कर्मेति व्याप्तेः न च संयोगेऽप्येवमस्त्विति वाच्यम् विरोधात् द्वितीयः कारणाकारणविभागात्कार्याकार्यविभागः यथा क
रतरुविभागात् कायतरुविभागः परत्वापरत्वे व्याख्याते बुद्धिज्ञानं तत् द्विविधं स्मरणमनुभवश्च
स्मरणं द्विविधं यथार्थमयथार्थं च तद्वति तत्प्रकारकं च यथार्थं तदभाववति तत्प्रकारकमयथार्थं पूर्वानुभव
संस्कारद्वारा स्मरणं जनयतीति पूर्वानुभवस्य यथार्थत्वायथार्थत्वाभ्यां स्मरणमुभयविधं भवति अनुभवो द्विविधः प्रमाऽप्र
मा यथार्थश्च तत्र प्रमा चतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दभेदात् अयथार्थज्ञानं चतुर्विधम् संशयो विपर्ययस्तर्कोऽनध्यवसायश्च सं
शयो यथा समानधर्मवद्धर्मिज्ञानविशेषादर्शनकोटिद्वयस्मरणैः स्थाणुर्वा पुरुषो वा इति ज्ञानं जन्यते तत्प्रकारसंश
यः विपर्ययस्तु समानधर्मवद्धर्मिज्ञानविशेषादर्शनैककोटिस्मरणैः शुक्तादौ रजतमिति ज्ञानं जन्यते तत्र गुरुमतेऽर
भित्त्यनुभवात्मकज्ञानं रजतमिति स्मरणात्मकं तेन गृहीतस्मरणात्मकं ज्ञानद्वयं तत्र रजतत्वविशिष्टज्ञानमिद
मित्यस्याप्यभावात् भानसामग्र्यभावात् प्रवृत्तिः स्मृततत्त्वोपस्थितेर्भेदाग्रहात् नैयायिकमते तु विशिष्टज्ञानं तेन
नेत्यत्र सिध्यतिस्वप्नस्तु अनुभवपदार्थस्मरणे दोषेण धातुदोषेण जन्यते अनध्यवसायश्च किंसंज्ञिकोऽयमिति ज्ञानं वि

स्यैवविनाशाय सर्वेशाश्व· प्रवृत्तत्वा' अथ गुणोत्पत्तिप्रक्रिया अवयवेषु विशेषगुणा अवयवविचित्रिश्च समानमातीः
पतुराणामारंभेन पृथिव्यांश्रिविशेषगुणा· पाकजा· तेद्विविधापाकप्रयोज्या· पाकजन्याश्च पाकारणगुणप्रक्रमजन्या· पा
कप्रयोज्या· अग्निसंयोगजन्याद्वितीया· श्यामघटेरूपस्याग्निसंयोगेन श्यामरूपनाशानंतरं घटे रक्तरूपमुत्पद्यते इति
नैयायिकमतं अग्निसंयोगेन परमाणुपाके सति परमाणौ रक्तरूपमुत्पद्यते पुनर्द्व्यणुकादिक्रमेण परमाणुगुणप्रक्रमेण घटे
रक्तरूपमुत्पद्यते इति वैशेषिकसमयः· कपालं नीलमेकं पक्वपीतं द्वितीयं तदारब्धघटे च अवयवरूपवैचित्र्यं सावयवे सति
अवयवनिरूपितावच्छेदकेन चित्रसाद्यामी [illegible] गुरुत्वं स्थितिस्थापकयोश्च कारणगुणप्रक्रमजन्यत्वात् द्वितीयाग्र
एवहानुकुष्टजन्या· परिमाणं चतुर्विधं अणुमहत्दीर्घह्रस्वाणुत्वमहत्त्वपरिमाणगुणप्रक्रमजन्याश्च महत्त्वं चतुरणुकमन्य
रिमाणजनकं स्वाश्रयवत्त्वं जन्यपरिमाणं असीगुला यथाघ्रमाणुद्वित्वसंख्या च अणुपरिमाणजनका ह्यणुकानां
त्रित्वसंख्यात्रसरेणुपरिमाणजनका अवयवमानाधिक्यसमयोगश्च प्रचयोपित्रजनकं यथा तूलपरिमाणं पृथ
केकारणगुणप्रक्रमजन्य त्नुतत्वकिंप्रमाणं यटास्व· पृथगिति प्रत्यय इति चेत् तस्यान्योन्याभावविषयकत्वा॥
मितिचेन्न अन्योन्याभावप्रत्ययवृत्तियोग्यतानुयोगितो· समानविभक्तिकत्वनियमात् यथा घट·पटोनभवति
अन्योन्याभावस्य इह पक्षे घटात्पटोनेत्यपि प्रयोगापत्तेः नचैवं घटादन्यः पट इत्यत्र कथं अन्योन्याभाव
नीतिरितिवाच्यम्· अन्यवस्त्वपिपृथक्त्वरूपत्वात् संयोगस्त्रिविधः अन्यतरकर्मजःउभयकर्मजःसंयोगजश्च आद्यो
यथा मेन·कर्मणा श्येनस्य संयोगः द्वितीयो यथा मेषयोः कर्मणा तयोः संयोगः तृतीयोयथा कारणाकार
णसंयोगात् कार्याकार्यसंयोगः यथा हस्ततरुसंयोगात् कायतरुसंयोगः· विभागस्त्रिविधः अन्यतरकर्मज·उ

वैशेषिकमुपपाद्यते प्रत्यक्षत्वं निवर्तते । स्पर्शवान्निर्भेजः । स्यादिति तर्केऽपि विषये प्रत्यक्षत्वे बोध्यं । पृथिव्यादावकर्मनिरूपणं
प्रत्यक्षविषये तेन तन्मते यथार्थज्ञानं द्विविधं संसर्गविपर्ययभ्रमस्मरणधर्मजन्यम् । स्मरणधर्मजन्यं
जन्यादृष्टो निःश्रेयसाधनं तत्तज्जन्यं द्विविधं जीवनयोनिविषयसूत्रपातप्रवृत्तिनिवृत्तिश्च प्रयत्नः
इतीयाद्दृष्टजन्यो नैमित्तिकजन्यो धर्मः । सुनिश्चितकर्मजन्यं अधर्मं । कृतिनिषिद्धाचरणजन्यः । वेग
क्रियाजन्यः । द्वितीयादिक्रियाजनकः । यथा वेगेन बाणगमनं लतिभावनाख्यः संस्कारोऽपि स्मृत्या
परकारणं । कारणगुणप्रक्रमजन्यः । गुरुत्वं कारणगुणजन्यं नैमित्तिकं द्रवत्वं च तत्र तद्गुणपदेनोक्तं
सहितकद्रवत्वेकात्प्रसमवायिकारणजन्यं संस्कारगुणप्रक्रमजन्यं शब्दस्त्रिविधः संयोगविभागशब्द
परिणामसंयोगजन्यः । द्वितीयादिशब्दः शब्दविभागजन्यः । तृतीयादिशब्दसंयोगेन विभागेन वा जायते ।
नमितिभिन्नवायुसंयुक्तेन वीचितरंगन्यायेन कदम्बगोलकन्यायेन वा जायते । उत्क्षेपणापक्षेपणा
नानि पंचकर्माणि । उत्क्षेपणत्वादिजातयः । पृथिवीजलतेजोवायुमनांसि क्रियाणि सर्वाण्यनित्या
न्यपीडिताणि प्रत्यक्षाणीन्द्रियप्रत्यक्षाणि । क्रिया संयोगेन नाशः कर्म
जन्यं क्रियातो विभागात्पूर्वदेशसंयोगनाश ततो उत्तरदेशसंयोगोत्पत्तिः तत कर्मविभागयोः
व्यापकं व्याप्यं व्याप्यव्यापकं सत्ताव्याप्यं घटत्वादि द्रव्यत्वादि व्याप्यव्यापकं च व्यक्तेरभेदः तुल्य
स्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः । नित्यत्वे सति अनेकसमवेतत्वं द्रव्यसामान्यलक्षणं
न्येव द्रव्याणि प्रत्यक्षाणि विशेषा तेच वह
प्रलये परमाणुनां भेदाय स्वीक्रियते तेषां वैधर्म्यं व्याप्यत्वादिति स्वस्वरूपभिन्नो नित्यद्रव्यसंबंध ॥

समवायः तेन स्वरूपसंबंधस्य संयोगस्य किंतत इत्यत्रैव [illegible] निरूपितामिति तत्र प्रमाणानि यानि [illegible] समवायादिपद [illegible] लघु
निरपेक्षः [illegible] प्रकारस्य [illegible] द्रव्याणि [illegible] गुणाः [illegible] स्यादि
[illegible] प्रत्यक्षं [illegible] तेजोभावः [illegible] अभावोपि द्विविधः संसर्ग
भावोऽन्योन्याभावश्च [illegible] प्रागभावो ध्वंसोत्यन्ताभावश्च प्रागभावो विनाशी [illegible] ध्वंसोऽजन्यो विनाशी
[illegible] अन्योन्याभावः [illegible] प्रत्यक्ष [illegible] प्रमाणं [illegible]
[illegible] प्रत्यक्षं [illegible] प्रमाणानि [illegible] करणं [illegible]
[illegible] प्रमाणानि चत्वारि प्रत्यक्षानुमानोपमानशब्दभेदात् [illegible] निर्विक
ल्पकसविकल्पकं च [illegible] करणानि [illegible] घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि [illegible]
[illegible] लौकिकालौकिकभेदात् [illegible] अलौकिकस्त्रिविधः ज्ञानलक्षणा सामान्यलक्षणा योगजधर्मश्च
लौकिकः षड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणता [illegible]
[illegible] संयोगेन [illegible] संयुक्तसमवायेन [illegible] द्रव्यसमवेत [illegible] जातीनां [illegible] संयुक्तसमवेतसमवायेन
[illegible] गुणत्व [illegible] जातीनां समवायेन [illegible] समवेतसमवायेन [illegible] विशेषणता
[illegible] अभावस्य [illegible] लौकिको [illegible] ज्ञानलक्षणा [illegible] सुरभि [illegible] सामान्यलक्षणा [illegible]
[illegible] योगजधर्मो योगिनां सर्वज्ञानम् तत्र निर्विकल्पकं [illegible] प्रकारत्वादि [illegible]
[illegible] सविकल्पकं [illegible] प्रकारकं [illegible] भासमाने [illegible] प्रकार [illegible]
[illegible] प्रकारः भासमानः [illegible] समवाय [illegible] सविकल्पकं [illegible] विशिष्ट

त॰स॰ साविनस्वरूपज्ञानसिद्धाभावः अनुमानं द्विविधम् स्वार्थं परार्थं चेति तत्र स्वार्थं स्वयमवसाधनम् अयं पर्वतो वह्निमानिति
६ तद्विनुक्ताहस्तोपनयनिगमनानि यथा वह्निमान् धूमात् यमयत्र धूमस्तत्राग्निः यथा महानसं वह्नि
व्याप्यधूमवांश्चायं तस्माद्वह्निमान् स्वार्थं परार्थं यथा पर्यादिजानुमानं तत्र परेण तत्त्व लिङ्गमहत्प्रत्यक्षं तत्र
योगम् लिङ्गं त्रिविधं केवलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकि भेदात् यत्र प्रत्यक्षव्यतिरेको भवत्यायमपि
सकेवलान्वयि यथा घटोऽभिधेयः प्रमेयत्वात् इत्यत्राभिधेयत्वस्य साध्यस्य व्यतिरेकाप्रसिद्धेः यत्र साध्यप्रसि
१७८ द्धिः तत्रातिरिक्ता नास्ति स केवलव्यतिरेकी यथा पृथ्वीइतरेभ्यो भिद्यते गन्धवत्त्वात् यत्र इतरभेदाभावः तत्र गन्धवत्त्वा
भावः यथा जलादिः व्यतिरेकव्याप्तिस्तु साध्याभावोऽव्यापक हेत्वभावोव्यापकः यत्र साध्यसाध्याभाव व्याप्यवत्तानु
सिद्धः सोऽन्वयव्यतिरेकी यथा पर्वतो वह्निमानिति अत्रान्वयव्यतिरेकिणि हेतौ अन्वयव्याप्तौ पक्षसत्त्व सपक्षसत्त्व
विपक्षासत्त्वमबाधितविषयत्वमसत्प्रतिपक्षितत्वमिति पञ्चरूपाणि केवलान्वयिनि विपक्षव्यावृत्तिर्नास्ति
केवलव्यतिरेकिणि सपक्षसत्त्वरहितं रूपचतुष्टयमेवापेक्षितम् यत्र साध्यसंदेहः स पक्षः यत्र साध्यनिश्चय
स सपक्षः यत्र साध्याभावनिश्चयः स विपक्षः साध्याभाववान् पक्षो बाधः साध्यविरोधि साधकोऽहेतुः सत्प्रतिप
दः सोपाधिकत्वासिद्धत्वादनन्तरं भङ्गवत्सपक्ष सोपाधिकत्वस्यव्यभिचारितानुमापकत्वेन उपाधिलक्षणमुच्यते
साधनाव्यापकत्वे सति साध्यव्यापक साधनाव्यापकत्वे सति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमुपाधेः यथा
धूमव्याप्तो गोलकं धूमवह्न्यादि आर्द्रेन्धनप्रभववह्निमत्त्वं उपाधिः साधनाव्यापकत्वे सति साध्यव्यापक इति
योयथावायु प्रत्यक्ष प्रत्यक्षस्पर्शाश्रयत्वात् अत्र बहिर्द्रव्यत्वपक्षधर्मावच्छिन्नसाध्यव्यापकत्वम् साध्यव्याप राम-
६

वैशिष्ट्यज्ञानस्य यथार्थत्वीप्रमत्वः अत्र मते तत्त्वं विशिष्ट वैशिष्ट्यं बुद्धे भावे ते अनुव्यवसाय प्रक्रिया ज्ञानाविद्विषसकिरकर्षो
तद्घट [illegible] निर्विकल्पकं ततो घटः इति निर्विशिष्ट ज्ञानं तत्र परतः प्रामाण्यग्रहः इति नैयायिकाः यथा [illegible] घट
इति व्यवसाय ततो घटमहं जानामीत्यनुव्यवसायः ततः प्रमात्वा प्रमात्वेयइति कोटिद्वयस्मरणं नतइदं ज्ञानप्रमाणभ्र
मात्वेति प्रामाण्यसंशयः ततो विशेषदर्शनानंतरं प्रमाण्यग्रहः इदं ज्ञानं प्रमाणं समर्थप्रवृत्तिजनकत्वात् ज्ञानंतरवत् स्वतः
प्रमाण्यग्रहः इति मीमांसकाः तेषु गुरुमते अयं घट इति ज्ञानं विषय आत्मा ज्ञानं प्रमा एवं च गृह्णाति मिश्रा रिमि
श्रमते अयं घट इति ज्ञानानंतरं घटमहं जानामीति अनुव्यवसायेन तत्प्रामाण्यग्रहः भट्टमते ज्ञानस्यातीन्द्रियत्वेन ज्ञा
नमनुमेयं यथा ज्ञाततया भवति प्रमात्वं यथा अयं घट इति ज्ञानानंतरं घटे ज्ञातता उत्पद्यते ततो ज्ञातो मया घट इति ज्ञातता
प्रत्यक्षे ततो व्याप्त्यादि प्रत्यक्षानंतरं ज्ञानानुमानम् यथा अयं घटत्वप्रकारकज्ञानवान् घटत्वप्रकारकज्ञातताश्रयत्वात् ता
वतैव तत्र धर्मधर्मिविषयकत्वेन प्रामाण्यानुमानम् इति प्रत्यक्षप्रमाणम् अनुमितिकरणम् अनुमानम् अनुमितिर्जन्य
ति व्यापारवदसाधारणकारणं करणम् व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकः हेतुज्ञानादिकरणं परामर्शो व्याप
र परामर्शश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानम् यथा वह्निव्याप्यधूमवानयमिति ज्ञानम् महानसादौ धूमवह्न्योः
सामानाधिकरण्यग्रहे सति धूमो वह्निव्याप्य इति अनुगृहीतायते ततः कालान्तरे पर्वते धूमो दृष्टे सति व्याप्तिस्मरण
[illegible] विशिष्टज्ञानम् वह्निव्याप्यधूमवानयमिति तृतीयज्ञानं लिङ्गपरामर्शः पक्षतासंनिहिते
न पर्वतो वह्निमानित्यनुमितिर्जन्यते व्याप्तिश्च हेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकर
ण्यं न च यत्संयोगवान् द्रव्यत्वादित्यव्याप्तिः प्रतियोगिव्यधिकरणहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसा
ध्यसमानाधिकरण्यमित्यर्थः प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिरत्यन्ताभाव इत्यर्थः पक्षतावस्थितसाध्य

न्या॰ देशान्तरतावधारणायाधिकरणमात्रिवारितोयन्ताननवद्विनासित चलान्यकानाव्यबोध अन्योन्याभावात् गङ्गायां
नेनान्वयप्रतियोगिध्वंसनिरासनि· तेनगिरिमुक्तपद्धिमानुपदेन इत्यनेनान्वयबोधः तत्तदर्थप्रतीतीच्छायोग्य
नाकामान्वयेनेनभोजनप्रकारणेभेदयमानयोगानुक्तमान्वयबोधोनभवति इत्याप्तिनाशदेनान्वयबोधजन्य ७
ज्ञाप्तिविधा शक्तिर्लक्षणा च शक्तिधर्मादिपदस्य घटादौ लक्षणा यथा गङ्गायां घोषः· इतिएतत्रिइन्त्रगङ्गापदार्थ
प्रवाहेघोषवासान्वयानुपपत्त्या गङ्गापदस्य तीरे लक्षणा इतिकथनेन याश्रया उपस्थिते तीरे घोषः· प्रतिबन्ध· नीन्व
न्वयबोधोभवतिगोरिति अक्तिपिल दगोचय शक्तिमाराधकोगोचो हेलक अभन्न दगोपान्तरादिसाह सम्प्रतीयते श
रूपदं न खलु तृर्विधम् योगिकं रूढं योगरूढं योगिकरूढं च श्राद्यपदार्थ्याचकादिपदे योगार्थेपाककर्तृविशद्भ सम्बद्ध
तीयपथाविशादिपदं रूढपदम् आद्यणवाचकम तृतीयपदं पंकजादिपदं योगरूढं तावकनिकसहेकदेशेन पद्मविनप
द्भवाचकम चतुर्थपथा उद्भिदपदं योगिकरूढं यस्मादिवाचकम रूढ्या गविशेषस्थलदृगाहिविधाजह
र्थोजहत्स्वार्थोच अाद्यागङ्गायांघोषइत्यादौ द्वितीयासवेकाजिराोया नीत्यादौ अत्रशक्तिराकांक्षादिसरस्यादिगम
नान्वयः अथ शाब्दबोधप्रक्रिया देवदत्तोग्रामगच्छतीत्यत्र ग्रामकर्मकगमनजनककृतिमानित्यन्वय
बोध द्वितीयार्थकर्मत्वं धातोर्गमनं जनकत्वं संसर्गमर्यादया लभ्यं लटोवर्तमानत्वं आख्यातस्य कृतिः तत्से
वथ संसर्गमर्यादयालभ्य सम्बन्धे रक्तत्वेवोधस्तत्राख्यातस्यव्यापारादौ लक्षणायाश्रयोगकर्मइत्यत्रगमनजन
कवर्तमानव्यापाराश्रयार्थे इधिपदोत्पादोद्वितीयालोपस्थिते इधिशब्दरवाजहत्स्वार्थे लक्षणायादकर्मत्वम
पस्थापयति पकवचनादिपस्थितेन कत्वादिसङ्ग्रप्रयामानुपदोपस्थापिते भमेति देवदत्तेन गम्यते ग्राम इत्य
त्रदेवदत्तनिष्ठकृतिजन्यगमनजन्यफलशालीग्राम इत्यर्थ· कर्मप्रत्ययेसर्गञ्जलन्तभवम् तृतीयायाश्रकृतिः राम
७

कमित्युक्तत्वव्याप्तमुपाधि तृतीयो यथा अंशो विनाशी जन्यत्वात् अत्र जन्यत्वावच्छिन्नविनाशित्वव्यापकं भावत्वमुपा
धि। इत्यं हेत्वाभासाः। केचन असिद्धविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः। तत्र व्यभिचारस्त्रिविध-साधारण
असाधारणानुपसंहारिभेदात् साध्यात्यन्ताभाववद्वृत्तित्वं साधारणत्वं यथा धूमवान् वह्नेः। सकलसपक्षविपक्षव्यावृत्तमसा
साधारणत्वं यथा पर्वतो वह्निमान् पर्वतत्वात् सर्वसपक्षत्वमनुपसंहारित्वं यथा सर्वमभिधेयं प्रमेयत्वात् साध्याभा
वव्याप्तो हेतुर्विरुद्धः यथा घटो नित्यः सावयवत्वात् साध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः यथा पर्वतो वह्निमान्
धूमवत्त्वात् पर्वतो वह्न्यभाववान् महानसान्यत्वात् असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्च
वेतः सम्सिद्धसाधनत्वात्। आश्रयासिद्धः यथा शशविषाणं नित्यं अजन्यत्वात् शरीरह्रदादिमान् हृदादिमत्त्वाद्दीप
मानत्वात् स व्यपदेशप्रतिहेतु। स्वरूपासिद्धः यथा पर्वतो वह्निमान् महानसत्वात् सविशेषणासिद्धविशेष्यासिद्धः
भागासिद्धभेदाद् द्विविधः आद्यो यथा शब्दो नित्यः चाक्षुषत्वे सति जन्यत्वात् द्वितीयो यथा शब्दो नित्यः गुणत्वे सति चा
क्षुषप्रत्यक्षत्वात् तृतीयो व्याप्यत्वासिद्ध्याख्यः निरवयवत्वात् सोपाधिको व्याप्यत्वासिद्धः यथा धूमवान् वह्नेः बा
धो यथा जलं ह्रदो वह्निमान् द्रव्यत्वात् तदेते हेत्वाभासाः [illegible] हेतुः इत्यनुमानं उपमितिकरणं उपमानम् कीदृशो
गवय इति श्रुत्वा गोसदृशो गवय इति उत्तरितो यदा गोसदृशं प्राणिनं पश्यति तदा पूर्वोक्तवाक्यार्थस्मरणानन्तरमयं ग
वयपदवाच्य इति शक्तिग्रहः सा उपमितिः इत्युपमानम् आप्तोक्तं शब्द प्रमाणं प्रक्तं तम्वाक्यं योगोकाक्षपदार्थज्ञान
घानादि पदज्ञानं करणं पदार्थोपस्थितिर्व्यापारः आकांक्षायोग्यतासत्तिज्ञानसहकारीमितिफलं
शाब्दबोधः स्वरूपयोग्यत्वेमति अजनितान्वयबोधजनकत्वमाकांक्षा तेन घटः कर्मत्वमानयनं कृतिरित्या
दिनान्वयबोधः स्वरूपयोग्यत्वात् अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राज्ञः पुरुष इत्यन्वयबोधोनपु

न॰प्र
८
इत्यत्रानन्तमोर्थः भोक्तृत्वं नीलत्वत्रभोजनेच्छावान्वर्तनीत्यर्थः भोक्तृमित्रा नीलत्वत्रकर्तृरिलक्षणभोजन
कर्तृरिमाक्वन्नित्यर्थः सविशेषणेकृतावप्रसिद्धत्वात्ययक्तनआस्वर्थकत्रविशान्तानत्वे॰ धात्वर्थअन्यफल
यानशब्दबोधः शब्दादीनांकर्त्रावाच्य॰ सविकायार्थकप्रकृतिकान्नोमाश्रयत्वलक्षणा एवंकर्तृकर्मक
मांतेनशब्देनाकर्त्रोकर्मचवाच्यम् भावकृदन्तात्कारलुडादीनांप्रयोगसाधुत्वमात्रमयाम्बर्थेतिरिकृभा
कृतान्तुपस्थानादिति ननुनीलंघटमानयेत्यादौद्वितीयाश्रवणात्कर्मत्वयवोधापत्तिः ननुविशिष्टस्य
कर्मत्वमितिचेत् नत्रविशेषणविभक्तेः साधुत्वायप्रयोगात् अत्रयमाविशेषणविभक्तेरभेदार्थः अत्राप्यविर
शेषः द्वितीयवदेषायसमासयोः पर्यायमान घटनेषावदनीलंघटं इत्यादौअभेदस्यपदार्थत्वेनप्रकारता
न्नसंसर्गतेव नीलघटमित्यादौकर्मधारयेलक्षणायाञ्चस्वीकारेणाभेदस्यापदार्थत्वेनसंसर्गत्वान्
तयाश्चवाच्यः समासयोरपर्यायताश्रयस्यानुरोधेनषष्ठीसमासेराजपुरुषइत्यादौषष्ठ्यर्थसंबंधस्यसंसर्ग
योरद्यालभ्यत्वात् वस्तुतस्तुविरुद्धविभक्त्यान्तचरकुस्याभेदबोधकत्वव्युत्पत्ते॰ सुस्यार्थराजभेदस्यबाधेन
राजपदस्यराजसंबंधिनिलक्षणाएवंबहुव्रीहौचरमपदस्यान्यपदार्थेलक्षणातयाचबहुकर्मधारयान्यस
मासेसर्वत्रतदर्थेलक्षणावचनत्वयोर्भावः अयंघटमनलमित्यादौघटभिन्नेनलक्षणानुकलंनभत्वेयेदित्या
दौपललललक्षणनिष्ठअनेकेलक्षणाक्रियासंगतस्थिचकारस्यात्यंतायोगव्यवच्छेदार्थः पार्थोनीलोराजेभव
सेनविशेषणसंगतस्यायोगव्यवच्छेदः यथापार्थः पाण्डवेतिविशेष्यसंगतस्यायोगव्यवच्छेदः पार्थएव रत्न
८

अन्यत्वं संसर्गः गमनं धात्वर्थः नन्वत्वं संसर्ग आपप्रत्ययेनेऽपदेशेनुपपन्ने इत्यस्येष्टदपत्तिक्रियाज्ञानं सम्यगर्थः अथ
प्रत्ययस्य तेषां फलाभावाद्यानतेपदार्थो बभासात् योग्युत्पन्निकत्वेन ज्ञानमित्यति इत्यत्रापि यथा प्रागभाव प्रतियोग्युत्प
त्तिका गमनानुकूल कृतिमानित्यर्थः तु दोषः अनन्वयत्वमत्त मपि स्तोऽर्थः उन्यात्र भूतत्वं च भूतत्वं भूतत्वं वर्तमानत्वं
स्येति तथा च विद्यमान ध्वंस प्रतियोग्युत्पत्तिकत्वं तत्त्वं लिङ्ग रोपि परोक्षत्व मतीनत्वं चार्थः विशिष्टोऽर्थः कृतिसाध्यत्वे
सति बलवदनिष्टाजनकेष्टसाधनत्वस्वर्गकामो यजेत इत्यादौ कृतिसाध्यत्वे बलवदनिष्टाजनकेष्टसाधनयागक
र्मकाभेदत्वार्थः आशीर्लिङ् लोटो इत्यर्थः पक्षिक बाधित विषयत्व मतेन घटसामान्येत्यत्र द्वार कर्मक मदिच्छाविषयज्ञान
यत्नानुकूल कृतिमानिष्यन्वयः व्याप्य क्रिया व्यापक क्रिया साध्या द्रव्य लुङोऽर्थः तात्पर्यं च वक्तृ भूतत्वं कृति
विषयत्वे लङ्ग्रथ्यते समः कर्मणि क्तार्थ समुत्तरास्य तत्स्वाश्रयत्वे लङ्गाय स विषय कार्य प्रकृतिकाख्यानस्या
लङ्गाय बाश्रयत्वे अर्थ ज्ञानामित्यादौ प्रसादात् एव्यर्थः यः पुरुषः तत्र च मया नीतन प्रकृत्यर्थ सजातीय क्रियां
तर ध्वंसकालीनत्वे सति चन्द्रमानारि कृति विषयत्वं पापत्यादौ ताद्दृशकालीनत्व मेवार्थः धात्वर्थ व्यक्ते अस्या
तस्य च र भेदलक्षणका नच विशिष्ट बाधकत्वं यत् तद्यामीनत्व च स्थूल काल माद्याय पूर्व पक्षो लीनत्वं कृ प्रत्यय का
र्ये पूर्वेद्युः संनिहित क्रियापेक्षयोगात् तत्पूर्वकालीनत्व तु न स्याभाव काल प्रतियोगि काद्यत्र कालीनत्व संप्रतियोगि
काल प्रतियोगिकत्वा नेन भुक्त मन्न न तु श्वो गमन प्राग भावा वच्छिन्न काल प्रति भोजनक भिन्नो त्व मतीनत्वं
समानविभक्ति भेदे नैवान्वयकत्वात् प्रत्यय स्येन न्यका परिविभक्ति लोपात् कालस्यात्पर्यवशात् अथ
प्रहितानाद्यहिंस साधार गोत्वे नूतनेन पूर्वस्मिन् विंशत्यासिद्धं हिंसमोगलङ्न्येन ताहृशः प्रयोगागमः

१२ धनुर्दरत्नादीपमंदिशास्त्रबोधमिति॥ श्री ॥ श्री ॥ श्री ॥ श्री॥ श्री ॥ श्री ॥ श्री ॥ श्री॥ श्री ॥ श्री॥ श्री॥
इति श्रीजगदीशभट्टाचार्यविरचितायां तर्कामृत समाप्तं ॥ शुभं भूयात् ॥ राम: सर्वजगतां शुभं भवतु ॥
संवत् १८८२ भाद्रपद प्रविष्टे १ तिथि १३ शुक्रवासरे श्री हरद्युषिंह पर्व्याम गंगोपकरेठ लिखित
मिदं उलकमुपाध्याय ज्ञातीय ताराचंदेन स्वार्थे परार्थे वा॥ ॥ ॥लेखकपाठकयो शुभमस्तु॥ ॥
ॐ ऋविनयमपनयविस्मोर्दमय मनः शमय विषयमृगतृष्णां भूतदयां विस्तारय तारय संसार सागरत:
दिव्यधुनिमकरंदे परिमलपरिभोगसच्चिदानन्दे श्रीपतिपादारविंदे भवभयखेदच्छिदे वंदे सत्यपि भेदापग
पगमे नाथ तवाहं न मामकीनस्त्वं सामुद्रो हि तरंग: क्वचन समुद्रो न तारंग: उद्धृतनग नगभिदनुज
नुजकुलामित्रमित्रशशिदृष्टे दृष्टे भवति प्रभवति न भवति किं भवतिरस्कार: मत्स्यादिभिरवतारैरवतारवतावता
सुधापरमेश्वर परिपाल्यो भवता भवतापभीतोऽहं दामोदर गुणमन्दिर सुन्दरवदनारविंद गोविन्द भवजल
धिमथनमंदिर परमं दरमपनय त्वं मे नारायण करुणामय शरणं करवाणि तावकौ चरणौ॥ इति षट्प
दी येमदनसरोमे सदा वसताद्वसतु॥ शुभं भूयात्॥ २॥ २॥ २॥ २॥ २॥ २॥ २॥ २॥

सर्वौसौमत्रि
सेला ६
मोलिग्रह १२
सुपारि १३
दूर्वा
केसर २५
बीड
माला
चावल
पतासे २१
लडू ४
पराकरीयाा ४
पुष्पमाला ४
पुष्प २५
सुटाहसेवेदा

पलाशौ २ मिठैटे
इत्तपिचत्र
डौरा २ चटौपिर
स्वरिर २ पटौरे २
तुलाई २ धृतपात्र २
दधिगोकामधुर २
कुमाग कुश्या १
गामय पलासमीघ २
दौन १ नालीयर
धोति १ उपरणे ५
सधमोल
सिंधूर २२ हबीरसम्या ६
सैरव हळजपुलिग्गे
दुकरीष्या ४

धोतिज्या ४
पूर्णपात्र ४
कलशा १
नटराग २
नुमपेल
शिलारेतु
हलपंजालि
पूलो धाहरो
कच्चाकोरा
दुग्धतेलमिका
सुवर्णधूप ६
दीप २ छायापात्र २
पचरंग २५ दीघट
किल्लामिकचु

नव्हीर २ स्त्रुर्वा २
गडवी २ कढि २
थाली २ कटोरी २
याकासेविनार २
लोविटिनार
चरनादि १
ज्ञासपल्लव
समीधत्र
इविरा
यथाशक्ति
गौनिधुन
इतिसामग्री